# શ્રીપરમગુરુપ્રભુવરાષ્ટકમ્

Shri Paramaguruprabhuvarashtakam

sanskritdocuments.org

March 16, 2019

Shri Paramaguruprabhuvarashtakam

# શ્રીપરમગુરુપ્રભુવરાષ્ટકમ્

## Sanskrit Document Information

Text title : paramaguruprabhuvarAShTakam

File name : paramaguruprabhuvarAShTakam.itx

Category : deities_misc, gurudev, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_deities_misc

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીપરમગુરુપ્રભુવરાષ્ટકમ્

પ્રપન્નજનનીવૃતિ જ્વલતિ સંસૃતિર્જ્વાલયા
યદીયનયનોદિતાતુલકૃપાતિવૃષ્ટિર્દ્રુતમ્ ।
વિધૂય દવથું કરોત્યમલભક્તિવાપ્યૌચિતીં
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૧॥

યદાસ્યકમલોદિતા વ્રજભુવો મહિમ્નાં તતિઃ
શ્રુતા બત વિસર્જયેત્પતિકલત્રપુત્રાલયાન્ ।
કલિન્દતનયાતટી વનકુટીરવાસં નયેત્
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૨॥

વ્રજામ્બુજદૃશાં કથં ભવતિ ભાવભૂમા કથં
ભવેદનુગતિઃ કથં કિમિહ સાધનં કોઽધિકૃત્ ।
ઇતિ સ્ફુટમવૈતિ કો યદુપદેશભાગ્યં વિના
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૩॥

તપસ્વિયતિકર્મિણાં સદસિ તાર્કિકાનાં તથા
પ્રતિસ્વમતવૈદુષીપ્રકટનોઢગર્વશ્રિયામ્ ।
વિરાજતિ રવિર્યથા તમસિ યઃ સ્વભક્ત્યોજસા
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૪॥

કિમદ્ય પરિધાસ્યતે કિમથ ભોજ્યતે રાધયા
સમં મદનમોહનો મદનકોટિનિમજ્જિતઃ ।
ઇતીષ્ટવરિવસ્યયા નયતિ યોઽષ્ટયામાન્ સદા
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૫॥

મૃદઙ્ગકરતાલિકામધુરકીર્તને નર્તયન્
જનાન્ સુકૃતિનો નટન્ સ્વયમપિ પ્રમોદામ્બુધૌ ।
નિમજ્જતિ દૃગમ્બુભિઃપુલકસઙ્કુલઃસ્નાતિ યઃ
સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૬॥

સમં ભગવતો જનૈઃ પ્રવરભક્તિશાસ્ત્રોદિતં
    રસં સુરસયન્મુહુઃ પરિજનાંશ્ચ યઃ સ્વાદયન્ ।
સ્વશિષ્યશતવેષ્ટિતો જયતિ ચક્રવર્ત્યાખ્યયા
    સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૭॥

સ્થિતિઃ સુરસરિત્તટે મદનમોહનો જીવનં
    સ્પૃહા રસિકસઙ્ગમે ચતુરિમા જનોદ્ધારણે ।
ઘૃણા વિષયિષુ ક્ષમા ઝટિતિ યસ્ય ચાનુવ્રજે
    સ કૃષ્ણચરણઃ પ્રભુઃ પ્રદિશતુ સ્વપાદામૃતમ્ ॥ ૮॥

ઇદં પ્રભુવરાષ્ટકં પઠતિ યસ્તદીયો જન-
    સ્તદઙ્ઘ્રિકમલેષ્ટધીઃ સ ખલુ રઙ્ગવત્પ્રેમભાક્ ।
વિલાસભૃતમઞ્જુલ્યાલ્યતિકૃપૈકપાત્રીભવન્
    નિકુઞ્જનિલયાધિપાવચિરમેવ તૌ સેવતે ॥ ૯॥

ઇતિ શ્રીમદ્વિશ્વનાથચક્રવર્તિવિરચિતં
    શ્રીશ્રીપરમગુરુપ્રભુવરાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Paramaguruprabhuvarashtakam*

pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*